# Shri Narasimha Gadyam or Gadya Stuti

# श्रीनरसिंहगद्यम् अथवा श्रीनरसिंहगद्यस्तुतिः

## Document Information

Text title : Narasimha Gadyam or Gadya Stuti

File name : narasiMhagadyam.itx

Category : vishhnu, dashAvatAra

Location : doc_vishhnu

Latest update : June 20, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2021

*sanskritdocuments.org*

# श्रीनरसिंहगद्यम् अथवा श्रीनरसिंहगद्यस्तुतिः

अथ ध्यानम् -
सत्यज्ञानसुखस्वरूपममलं क्षीराब्धिमध्ये स्थितं
योगारूढमतिप्रसन्नवदनं भूषासहस्रोज्वलम् ।
त्र्यक्षं चक्रपिनाकसाभयकरान्बिभ्राणमर्कच्छविं
छत्रीभूतफणीन्द्रमिन्दुधवलं लक्ष्मीनृसिंहं भजे ॥

देवाः -
भक्तिमात्रप्रतीत !
नमस्ते नमस्ते !
अखिलमुनिजननिवह !
विहितसवनकदनकर !
खरचपलचरितभयद !
बलवदसुरपतिकृत विविधपरिभवभयचकित !
निजपदचलित निखिलमखमुखविरहकृशतरजलजभवमुख
सकलसुरवरनिकर कारुण्याविष्कृतचण्ड दिव्य नृसिंहावतार !
स्फुरितोदग्रतारध्वनिभिन्नाम्बरतार !
निजरणकरणरभसचलितरणद सुरगणपटुपटहविकटरव
परिगत चटुलभटरवरणित परिभवकर धरणिधर !
कुलिशघट्टनोद्भूतध्वनिगम्भीरात्मगर्जितनिर्जितघनाघन !
ऊर्जितविकटगर्जितसृष्टखलतर्जित सद्गुणगणोर्जित !
योगिजनार्जित !
सर्वमलवर्जित !
लक्ष्मीघनकुचतटनिकटविलुण्ठन विलग्नकुङ्कुम
पङ्कशङ्काकरारुण मणिकिरणानुरञ्जितविगत शशाकलङ्क
शशाङ्कपूर्णमण्डलवृत्त स्थूलधवलमुक्तामणि
विघट्टितदिव्यमहाहार !

ललितदिव्यविहार !
विहितदितिजप्रहार !
लीलाकृतजगद्विहार !
संसृतिदुःखसमूहापहार !
विहितदनुजापहार !
युगान्तभुवनापहार !
अशेषप्राणिगणविहित !
सुकृतदुष्कृत !
सुदीर्घदण्डभ्रामित बृहत्कालचक्रभ्रमणकृतिलब्धप्रारम्भ !
स्थावरजङ्गमात्मकसकलजगज्जालजल धारणसमर्थ
    ब्रह्माण्डनामधेय महापिठरकरण प्रवीणकुम्भकार !
निरस्तसर्वविस्तार !
निरस्तषड्भावविकार !
विविधप्रकार !
त्रिभुवनप्रकार !
अनिरूपितनिजाकार !
नियतभिक्षादिलब्धगतरसपरिमित भोज्यमात्रसन्तोष !
बलविजित मदमदननिद्रादिदोषजनधनस्नेहलोभादि
    दृढबन्धनच्छेद लब्धसौख्य
    सततकृतयोगाभ्यासनिर्मलान्तःकरणयोगीन्द्रकृतसन्निधान !
त्रिजगन्निधान !
सकलप्रधान !
मायापिधान !
सुशुभाभिधान !
मदविकसदसुरभटमकुट वनानलनिभनयन !
विलसदसिकवचभुजघनवनलवननवरुधिरक्रमकल्पित
    मीनशङ्खत्तरङ्गशैवालमहाजलूकदुस्तरपङ्कजलनिवहकलित
    महासुरपृतनाकमलिनीविलोलनकेलिप्रिय मत्तवारण !
दुष्टजनमारण !
शिष्टजनतारण !
नित्यसुखविचारण !
सिद्धबलकारण !

सुदुष्टासुरदारण !
सदृशीकृताञ्जन !
जनदोषभञ्जन !
घनचिन्निरञ्जन !
निरन्तरकृतभक्तवाञ्छन !
गतसर्ववाञ्छन !
विश्वनाटकसूत्रधार !
अङ्घ्रिधूलिजातखसिन्धुधार !
मध्वसृक्कुतचक्रधार !
जनितकाम !
विगतकाम !
सुरजनकाम !
उद्धृतक्षम निश्चलजनसत्क्रियाक्षम !
सुरनतचरण !
धृतरथचरण !
विविधसुरविहरण !
विगतविकार !
विकरण !
विबुधजनशरण !
सततप्रीत !
त्रिगुणव्यतीत !
प्रणतजनवत्सल !
नमस्ते नमस्ते !

इति श्रीनृसिंहगद्यं सम्पूर्णम् ।
अथवा
इति श्रीनृसिंहगद्यस्तुतिः समाप्ता ।

*Shri Narasimha Gadyam or Gadya Stuti*

pdf was typeset on June 20, 2021

Please send corrections to *sanskrit@cheerful.com*